# Shri Ghanashyamam

# શ્રીઘનશ્યામમ્

## Document Information

Text title : Shri Ghanashyamam

File name : ghanashyAmam.itx

Category : vishhnu, svAminArAyaNa, krishna, aShTaka

Location : doc_vishhnu

Acknowledge-Permission: Swaminarayan Sampradaya

Latest update : August 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 9, 2024

*sanskritdocuments.org*

# શ્રીઘનશ્યામમ્

વદનં મધુરં હસિતં મધુરં નયને મધુરે શ્રવણે મધુરે ।
અલિકં મધુરં તિલકં મધુરં ઘનશ્યામહરેરખિલં મધુરમ્ ॥ ૧॥

હૃદયં મધુરં હૃદ્યં મધુરં વક્ષો મધુરં માલ્યં મધુરમ્ ।
કણ્ટં મધુરં ગીતં મધુરં ઘનશ્યામહરેરખિલં મધુરમ્ ॥ ૨॥

હસ્તૌ મધુરૌ પ્રતલૌ મધુરૌ સુમણી મધુરૌ કફણી મધુરૌ ।
વલયં મધુરં વરદં મધુરં ઘનશ્યામહરેરખિલં મધુરમ્ ॥ ૩॥

નાભિર્મધુરા ત્રિવલી મધુરા સુકટિર્મધુરા રસના મધુરા ।
ઉદરં મધુરં વસનં મધુરં ઘનશ્યામહરેરખિલં મધુરમ્ ॥ ૪॥

ચરણે મધુરે પ્રપદે મધુરે ઘુટિકે મધુરે પ્રસૃતે મધુરે ।
રૂપં મધુરં મનનં મધુરં ઘનશ્યામહરેરખિલં મધુરમ્ ॥ ૫॥

શ્રવણં મધુરં સ્તવનં મધુરં સ્મરણં મધુરં જપનં મધુરમ્ ।
ભજનં મધુરં યજનં મધુરં ઘનશ્યામહરેરખિલં મધુરમ્ ॥ ૬॥

નમનં મધુરં દાસ્યં મધુરં સખ્યં મધુરં વચનં મધુરમ્ ।
સ્વનિવેદનકં મધુરં મધુરં ઘનશ્યામહરેરખિલં મધુરમ્ ॥ ૭॥

મુક્તા મધુરા ભોગા મધુરાઃ સ્વામિનારાયણગાદી મધુરા મધુરા ।
શરણં મધુરં બિરુદં મધુરં ઘનશ્યામહરેરખિલં મધુરમ્ ॥ ૮॥

ઇતિ શ્રીસ્વામિનારાયણ ગાદી-આદ્યાચાર્યપ્રવર
શ્રીમુક્તજીવનસ્વામિબાપાવિરચિતં શ્રીઘનશ્યામમધુરાષ્ટકં સમ્પૂર્ણમ્ ।

pdf was typeset on August 9, 2024

Please send corrections to *sanskrit@cheerful.com*